M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.

Ser. 794

Title: Prāyaschita Rahasya

794

प्रायश्चित्त प्रकार from ऋजुमिताक्षरा

~~Prāyas~~ Prāyaschitta Prakāra	Title
from Ruju Mitākoharā	Author
	Editor
	Year. Vols.
	Publisher
794	Remarks

अचिकित्स्यास्त्वयेरोगा येरोगा निरूपायिनः तेषां निर्दृष्टनाशाय तिलै सौधानमर्चयेत्॥

794

श्रीः ॥ अनुभिलाप्रायांप्रायश्चित्तकृच्छ्रादिलक्षणं गोमूत्रंगोमयंक्षीरं दधिसर्पिःकुशोदकं अन्ध्वा
पंचगव्यपवासेकृच्छ्रंसांतपनंचरेत् १ पूर्वेद्युराहारांतरपरित्यागेन गोमूत्रादिगव्यानिकुशोदकसहि
तानिसंयुज्यपीत्वापरेद्युरुपवासेद्विदिनसाध्यःकृच्छ्रः सांतपनः कृच्छ्रः ~ एकभक्तेननक्तेनतथैवायाचितेन
नच उपवासेनचैवायंपादकृच्छ्रःप्रकीर्तितः अनेनक्रमेणदिनचतुष्टयसाध्योयंपादकृच्छ्रः अयमे
वावृत्तित्रयेणविहितोद्वादशदिनसाध्योयंप्राजापत्यःकृच्छ्रः त्रिंशत्संख्याकैःकृच्छ्रैःएकाब्दप्रायश्चित्तं·
अशक्तंप्रतिकृच्छ्रप्रत्याम्नायानाह मूलग्रंथे कृच्छ्रेदेव्ययुतंचैवप्राणायामशतद्वयं तिलहोमसहस्रं
तुवेदपारायणंतथा विप्राद्वादशवापिदुग्धापावकेष्टिस्तथैवच अन्यावापावमानेष्टिःसमान्याकृच्छ्रमेनीषि
णः देव्ययुतंगायत्रीदशसहस्रंजपः प्राजापत्यकृच्छ्रस्यसत्तप्रत्याम्नायाः पयःशरमते कृच्छ्रोयुतंच
गायत्र्याउपवासास्तथैवच धेनुप्रदानंविप्रायसममेतत्स्वल्पकृष्टयं जपादीनांपुरुषविशेषेणव्यवस्था
माकृच्छ्रेले धर्मनिष्ठास्तपोनिष्ठाःकदाचित्पापमागताः अपहोमादिकंतेषांयुविशेषेणाभिधीयते
नामधारकविप्राये मूर्खाधर्मविवर्जिताः कृच्छ्रचांद्रायणादीनितेषांद्विगुणेषत ~ मिताक्षरा
यांप्रथमे अ? यत्किंचित्कुरुतेपापंज्ञानतोज्ञानतोपिवा अपि गोचर्ममात्रिपात्रमिदानेनशुध्यति गोच
र्मलक्षणं बृहस्पतिनोक्तं सप्तहस्तेनदंडेनत्रिंशद्दंडं निवर्तनं दशतान्येवगोचर्मदत्वास्वर्गेमहीयते ~

गायत्रीं त्रिःसकृद्वापिजपेद्ब्राह्मणपर्वकं मधुवाता इतित्र्यृचं मध्विस्येतत्त्रिकंतथा ~ अत्रसुवेदुःखेवि
पुण्येत्रियोब्राह्मणाएवा वेदार्थवित् ज्येष्ठसामा त्रिमधुत्रिसुपर्णकः ~ स्वस्त्रीयगताचारनिंदिताः
याज्यभ्यइस्मात्कुलाः त्रिणाचिकेतदौहित्रशिष्यसंबंधिबांधवाः व्याख्या सर्वेष्वेवनिर्गुणाः नपुंस
अनन्यमनस्कतयाप्यस्खलिताध्ययनक्षमा अग्र्याः श्रोत्रियःकृताध्ययनसंपन्नोभिहितःशांतःस
मध्यमवयस्कः मंत्रब्राह्मणयोरर्थवेत्तीति ज्येष्ठसामसामविशेषः तदध्ययनांगव्रतं स्वज्ञनःस
यस्त्वधीतेसज्येष्ठसामा त्रिमधु ऋग्वेदैकदेशतद्व्रतं तद्व्रताचरणेनतदध्यायीत्रिमधुरभिहितःयो
यजुषोरेकदेशस्तद्व्रतं तद्व्रताचरणेनयस्तदधीते सत्रिसुपर्णकः स्वस्त्रीयाभोगाध्यायी
णाचिकेतं यजुर्वेदैकदेशंतद्व्रतं तद्व्रताचरणेन यस्तदध्यायीसत्रिणाचिकेतः औपपदथीं
अग्नेताः सन्यासिनोक्षयाहेतु स्कतेनपार्वणमेवकर्तव्यं एकोद्दिष्टंयतेर्नास्ति त्रिदंडग्रहणादिह
सपिंडीकरणाभावात्पार्वणंतस्यसर्वदा इतिप्रथमेध्याये व्यवहारे ततोर्थीलेखयेत्सद्यःप्रति
ज्ञातार्थसाधनं किंतत्साधनं प्रमाणंलिखितंभुक्तिःसाक्षिणश्चेतिकीर्तितं एषामन्यतमाभा
वेदिव्यान्यतममुच्यते प्रमीयते परिच्छिद्यतेनेतिप्रमाणं तच्चद्विविधं मानुषंदैविकंच लिखितादि
पश्यतोऽब्रुवतोभूमेर्हानिर्विंशतिवार्षिकी अनागमंतुयोभुंक्ते बहून्यब्दशतान्यपि चौर
दंडेनतंपापंदंडयेत्पृथिवीपतिः

श्री: ऋतुभिला श्चितधिया पारिचिंतनीयेमाराधितो पिनृपतिः परिशंकमायः अंके स्थिताधि
पद्मपुपवसेत्क गीयाशास्त्रेनृपेन्द्रपुवतोचकृतः स्थिरत्वं ॥ गोमूत्रगुणाः गोमूत्रंकटुतिक्तमोष्णं
लानिसंयुअपीत पित्तकृद्दीपनंमेध्यंत्वग्दोषघ्नमतिप्रदं ॥ महिषीमूत्रनामाह शोफगुल्मेषु
नच इपवासे कुष्टकंडूतिशूलोदरहृद्रापहं ॥ पलद्वयंतुप्रसृतंद्विगुणंकुडवंस्मृतं चतुर्भिः कुडवैः
वारत्नित्रयेखार आढकाः आढकैस्तैश्चतुर्भिश्चद्रोणस्तुकथितोबुधैः कुंभोद्रोणद्वयंशूर्पः खारीद्रोणा
अशक्तंप्रति कुडुलाः पंचतेमाषास्तेसुवर्णस्तुषोडश पलंसुवर्णाश्चत्वारः पंचवापिप्रकीर्तिताः मानु
तुवेदपार० इंद्रैर्नेत्ररविपंचवेदघ्नं वेदंवेध्यायुधाष्टनवत्रिर्गुणिताश्चसाध्यात् दिग्भिर्गोविश्वकृति
गजाग्निमुनीषुवेदषड्वह्निभिश्चगुणितानथसाध्यकार्णात् ॥ नामानुलादकटवा द्वजाभनकशेषंज्ञा
लोमयोरधिकशेषयुतंसवर्णंस्यात् अ इ ई उ ऋ लृ ए ऐ ओ औ अं अः अवर्गः कादिटांतः कवर्गः ठादिफांतः
ठवर्गः बादिहांतः बवर्गः ॥ पांचालसौराष्ट्रविदर्भकेषु राहुःफलं पौंड्रकलिंगयोश्च अंभासवंगगुर्जर
यावनेषुसस्थश्चरस्योकफलंचतस्मात् रसेश्वरः कौंकणमालवाख्ये स्यान्मेघनाथस्यफलंतथैव।
विंध्यस्यदक्षेफलमीषजंस्या मेषार्करात्रौ किलगौडदेशे ॥

बलेनप्रकृत्यानीत्यामंत्रपौरुषविक्रमैः सहायैश्चैवमित्रैश्चनालभ्यंलभतेनरः ॥ लाभालाभसुखदुःखवि
वाहेमृत्युजीवने रोगेभोगेवियोगेचदैवमेवहिकारणं ॥ कुरूपाः कुकुलामूर्खाः कुत्सिताचारनिंदिताः
शौर्यविक्रमहीनाश्चदैवाद्राज्यानिभुंजते ॥ काणाः खंजाश्चव्याध्यनीतिहीनाश्चनिर्गुणाः नपुंस
काश्चदृश्यंते दैवाद्राज्येप्रतिष्ठिताः रौद्राद्भुतश्चशृंगारोहास्यवीरोदयातथा भयानकश्चबीभत्सः शांतःस
प्रेमभक्तिकः ॥ मल्लानां० अशनिः रौद्रः नृणां नरवरः अद्भुतः स्त्रीणां स्मरः शृंगारः गोपानां स्वजनः हा
स्यरसः असतां शास्ता वीरः पित्रोः शिशुः दया भोजपतेः मृत्युः भयानकः अविदुषां विराट् बीभत्सः यो
गिनां तत्त्वं शांतिरसः वृष्णीनां परदेवता सप्रेमभक्तिकः षट्शास्त्राणि पूर्वमीमांसाद्वादशाध्यायी
जैमिनिः १ उत्तरमीमांसाचतुरध्यायीव्यासः २ तर्कः सप्तपदार्थीकाणादयः ३ न्यायः षोडशपदार्थी
गौतमः ४ सांख्यं कापिलं ५ पातंजलं योगः शेषोक्तः ६ चतुर्दशविद्या तत्रादौदशग्रंथाः शिक्षा
कल्पो व्याकरणं निरुक्तं ज्योतिषं छंदः ६ संहिता पदानि अरण्यं ब्राह्मणं एवं १० चतुःशास्त्र पूर्व
मीमांसा उत्तरमीमांसा तर्कः न्यायश्च ४ संहिता अरण्यं ब्राह्मणं ३ शाखा ग्रंथत्रयं वेदाः ४ पुरा
णं न्यायः मीमांसा धर्मशास्त्रं शिक्षादिषट् एवं १४ विद्याः उपवेदाः ४ एवं १८ इतिभेदः
हस्तद्विः क्रियते कर्मरूपद्भिरनुभूयते शकुनः शपथः प्रश्नः सामुद्रिकमुपश्रुतिः एतेकलियुगेवै
वफलंतिनफलंतिच ॥

3 तिर्यग्यवोदराण्यष्टौ ऊर्ध्वा वा व्रीहयस्त्रयः प्रमाणमंगुलस्योक्तं वितस्तिर्द्वादशांगुलः ~ हस्तो वितस्तिद्वितीयं दंडो हस्तचतुष्टयं तत्सहस्रद्वयं क्रोशो योजनं तच्चतुष्टयं इतिव्यवहारे विषभक्षणकृतस्य पुंसः लक्षणानि वेगो रोमांचमाद्यो रचयति विषजः स्वेदवक्त्रोपशोषौ तस्योर्ध्वस्तत्परौ द्वौ वपुषि जनयतो वर्णभेदप्रवेपौ यो वेगः पंचमो सौ नयनविरसतां कंठभंगं च हिक्कां षष्ठो निश्वासमोहौ विचरति च मृतिं सप्तमो भक्षकस्य ~ अनिष्टकष्टैर्विविधैः दुष्टदृष्टं विनिघ्नं स्वसुखकामाद्यो अनन्याभावेन सदावदान्यं शरण्यमीशं शरणं गतोस्मि ~ रणकर्दममर्दनार्त्तिगन्नी विवरस्थो नहि शर्म मम लेभे करुणार्णववर्णनीयकीर्ते हर मामुद्धर दुःखपंजरांतात् ~ भद्रापक्षांतरिक्ते प्रतिदिन जनिभे श्राद्धषष्ठीषु रात्रौ संध्यापाता रभास्वछनिषु घटधनुः कर्ककन्यागतेर्के जन्मर्क्षे लग्नमासे सुरदिनपजने भूषिते ग्रामयायी भुक्तोप्यस्तेष्यापि चिन्त्यः समरात्रिगामिषु श्मश्रुकार्यं न कुर्यात् ~ के विगो वांदापहपे प्रजान्युक्त ममाज्ञिना वाधोन्नहसनिश्री पुशाच्च गे विगयेन्वये ~ रवौ पुष्पं गुरौ दूर्वा भौमवारे मृत्तिका भार्गवेगोमयं क्षिप्त्वा स्नायात्तैलेन सर्वदा ~ आपादतु गहस्थानो भावकक्षब्रह्मचारिणो आगलं तु यतीनां च वानप्रस्थो न कारयेत् ~ अकृतोपद्रवः कश्चिन्महानपि नश्यते नागान्यज्ञयते लोके न तादृश्येन नागघातिनं ~ श्राद्धद्वयं नैकपाके नैकाकौ भोजनद्वयं संध्याद्वयं नैव कालेन हरेः पजनद्वयं ~ तैलजामरसंस्पृष्टाप्यपतेर्गजनारथा सभायाति गजो मूरखः पतंगद् मरासभा ~ हाशरथ्योभयसागीरथस्पृष्टांतगर्जमा गजो मूरखे सभायाति भल्लुक श्कतगोलिका ~ मृत्युर्वधः प्रियश्चैव

स्फवार्ता विजयः सुखं संतापः कलहश्चैव रविवारादिषु क्रमात् ~ रवमध्यस्थितसंगण्यं रविभादष्टवर्जितं नरवघ्नंनवतिर्भा के शेषास्युर्घटिका निशि ~ कापायेजयशर्मलाभकुगिरो मित्राणि सर्वं शुभं गोरायेप्रिय भुक्धनानिलपरेलाभारिनाशादिकं रेयंगे कहेलेप्रियं ववलगे सुखानानि मिजागमो रोरारांविपदः परां गकलहः रवालेयशो कापक्त ~ चैत्रादिमासं रसर्सं प्रगुण्यं चतुष्कमिश्रं तिथिसंयुतं च अष्टाभिजेनाष्टग तं निशायां पूर्वादिदिक्षु क्रमशो विदध्यात् प्राचीं न्लिया वनोस्वंद्रेनगच्छेद्दक्षिणां गुरौ रवौ शुक्रे प्रतीचीं च कुजे हे नोत्तरां व्रजेत् ~ अभिनवनवनीतस्निग्धमापीतदुग्धं धधिकणपरिदिग्धं स्निग्धमंगं मुरारेः दिशतु भुवनकृच्छ्रच्छेदि तापिच्छगुच्छच्छवि नवशिखिपिच्छालांछितं वांछितं नः ~ नजातुकामः कामानां उपभोगेन शाम्यति हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ~ यत्पृथिव्यां व्रीहि यवं हिरण्यं पशवः स्त्रियः नालमेकस्य तत्सर्वमिति पश्यन्न मुह्यति ~ यदा भावं न कुरुते सर्वभूतेषु पातकं कर्मणा मनसा वाचा ब्रह्म संपद्यते तदा ~ यदान्येभ्यो न बिभ्यति यदा यस्मान्न बिभ्यति यदा नेच्छति न द्वेष्टि ब्रह्म संपद्यते तदा ~ या दुस्त्यजा दुर्मतिभिर्या न जीर्यति जीर्यतः योसौ प्राणांतिको रोगस्तां तृष्णां त्यजतः सुखं ~ जीर्यंति जीर्यतः केशा दंता जीर्यंति जीर्यतः जीविताशा धनाशा च जीर्यतोपि न जीर्यते ~ यच्च कामसुखं लोके यच्च दिव्यं महत्सुखं तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलां ~

४ दारिद्र्यायनमस्तुभ्यं शुद्धोहं त्वत्प्रसादतः अहंचसर्वान्पश्यामि मांचकोपिनपश्यति॰ इकृतार्थिककाकस्तुयुक्ति
पाषाणदर्शनात् भीत्यापलायमानोपिपपातचममारच॰ यत्रवाक्यद्वयेबिंबप्रतिबिंबतयोच्यते सामान्य
धर्मोवाक्यद्वये सदृष्टांतोनिगद्यते॰ १वेदविद्याविहीनस्यविद्याजालंनिरर्थकं कंठसूत्रविहीनायाःकामिन्या
भूषणंयथा॰ तालव्याअपिदंत्याश्चसत्यसकारपांसवः प्रसज्यप्रतिषेधोयंक्रिययासहयत्रनञ् पर्युदासः
सविज्ञेयोयत्रोत्तरपदेननञ्॰ संयोगोविप्रयोगश्चसाहचर्यंविरोधिता अर्थःप्रकरणंलिंगं शब्दस्यान्यस्य
संनिधिः साहित्यमौचितीदेशःकालोव्यक्तिःस्वरादयः शब्दस्त्रिधावाचकोथलक्ष्यकोव्यंजकोपिच॰
तत्संबंधोयथानद्यांमत्स्योघोषोद्विजाहुति परतीरपवित्रत्वं स्यात्शब्दःक्रमादसौ॰ धूर्तःकश्चनदुर्ग
तिप्रवधूसंगेरतस्तत्क्षणाद्दृष्टस्तत्सुतिनातदानिजमुखभीत्यादधौतत्कुचौ॰ दृष्टस्तेनतदावदद्धिशुरहंस्वै
रंपिबामिस्तनंशुद्ध्येकिंनिहितंपयःस्रवतितद्वारंनिरुद्धंमया॰ शताधैरत्निःस्याद्धस्तपरिमितरत्निविततं
सहस्तेहस्तंस्याद्युतहवनेहस्तयुग्मं चतुर्हस्तंलक्षप्रयुतहवनेषड्ढस्तमितः ककुब्दिक्कोटौनृपकरमिति
ज्ञाकुरपरे॰ निमित्तिकं कुर्यात्स्वयतःसन्मलिम्लुचे अवषट्कारहोमाश्चपर्वचाग्रयणंतथा मलमा
सेपिकर्तव्यंकाम्याइष्टीश्चवर्जयेत् गृह्यपरिशिष्टे कृष्णाग्रयणे॰ एतनाहरिवधार्थमायायोप्रापसेवव
धमात्मनस्तदा यःपरस्यविषमंविचिंतयेत् स्वाप्नुयात्सकुमतिःस्वयंहिततत्॰ विधिहृष्टंतुयत्कर्मकरोत्यविधि
नानरः फलंनकिंचिदाप्नोति क्लेशमात्रंहितस्यतत्॰

भारतश्रवणविधानं याज्ञवल्क्यः त्रिरत्नपूर्णपृथिवीदानस्यफलमश्नुते तपस्तप्यपरत्रेह नित्यस्वाध्यायवान्द्विजः य
स्ययस्यजपःप्रोक्तोब्रह्मयज्ञोमनीषिभिः तेनतेनभवेद्द्विजो नित्यस्वाध्यायवान्द्विजः एकतश्चतुरोवेदान्कृत्वाभारतमे
कतः विष्णुनातुलितंयावत्तावद्धिगुरुभारतं भातिसर्वेषुवेदेषु रातिसर्वेषुजंतुषु तरणंसर्वपापानां तस्माद्भारतमु
च्यते यस्यनास्तिसुतःपुंसोयस्यदुःस्थातिदारुणा यस्यचातुर्थिकोव्याधिःश्रोतव्यंतेनभारतं यथाधातुत्रयेहेमवज्ररत्नो
त्रयेतथा तोयेषुजाह्नवीतोयंतथाशास्त्रेषुभारतं अपमृत्युविनाशायमहाशोकापनुत्तये कलाभिज्ञानसौख्याय
श्रोतव्यंभारतंनृभिः धर्मार्थकाममोक्षाणांचतुर्णामुत्तमंफलं प्राप्नोतियोजयोस्त्वाव्यासवक्त्रानकध्वनिः कतकेनैवपानी
यंनिर्मलंजायतेयथा भारतश्रवणान्नृणांतथानिःकल्मषंमनः पवित्रंनिर्मलंस्वाद्यंपथ्यंस्वर्गंरुचिप्रदं तथैवभारतंलो
केश्रोतव्यंतेनमानवैः प्रयागेमकरस्नानंद्विजातिप्रियवाक्यं भारतश्रवणंचैवसन्मतंत्रयस्मृतं तत्रभारतश्रवण
विधिरुच्यते स्नात्वागंगाजलेपुण्येकृताह्निकविधिर्नरः शृणुयाद्भारतंसम्यक् आदिपर्वपुरःसरं प्रति
पर्वसमाप्तिंचधेनुंदद्यात्सवत्सकां समाप्तेसतिसर्वस्मिंल्लक्षहोमोविधीयते होमांतेविधिवद्दद्यादृ
त्विग्भ्योभूरिदक्षिणां ततोवक्तारमभ्यर्च्यसंपूज्यचयथाविधि भूषणैर्हस्तकर्णानांवस्त्रैःक्षौमादिभिःसुधीः रा
ज्ञतेसुदृढंजिष्णुंकुंजरंदशभिःपलैः चतुर्दंतंसकुथंपत्सांकुशंचसपिंजरं विधायविधिवद्दद्यादाचार्यायस
दक्षिणां आचार्याणींसमभ्यर्च्य वस्त्रालंकारभूषणैः आचार्यपूजनमंत्रः आचार्यस्त्वंमहाविष्णुर्व्यास
रूपनमोस्तुते प्रसन्नेत्वयिविप्रेंद्र प्रसन्नोमेजनार्दनः मयातेवस्नाद्विजपवित्रंभारतंश्रुतं तेनमेसफ

४ लाः कामाः सकलाः संतु सत्वरं ततः सर्वेभ्यो श्रोतृभ्यो यथाशक्ति धनं दद्यात् भारतस्य च वक्त्रे भारत पुस्तकं दद्यात्

५ इति विधानं अथ हरिवंश विधानं जयस्य श्रवणे प्रोक्तं हरिवंशस्य सूरिभिः श्रवणान्ते हरेर्मूर्तिः सश्रीक

स्य च दीयते सुवर्णेन कृतां सम्यक् लक्ष्मीकांपलमानतः विशेषोत्र समुद्दिष्टो मुनिभिस्तत्रदर्शिभिः एकान्तरं

त्वचर्येण यावद्ग्रंथः समाप्यते समाप्तौ विधिवद् धाद्दूस्त्रं क्षौमं द्विजातयः भोजयेन्मिथुनान्येव चतुर्विंशतिरा

दरात् प्रसवरो हि जातवेदः इति मंत्रेण विशेषाहुवर्नं सह स्रसंख्यां कुर्यात् एवं कृते विधानेन च प्रजां प्राप्नोति मान

वः धनमारोग्यमायुष्यं सौभाग्यं गुणगौरवं प्राप्नोति मनुजः सम्यक् नात्र कार्या विचारणा इति विधा

नमालायां भारत हरिवंश श्रवण विधानं संपूर्णं श्रीरस्तु

तुलसी बिल्व निर्गुंडी जंबीरामलकी तथा पंचबिल्वा इति ख्याता एकबिल्वं शिवार्पणं

बह्वृचाः सामगाश्चैव तथा चाथर्वणा द्विजाः महारुद्र जपेनैव नियोज्याः

इति धर्मतः यस्तु रुद्रं जपेन्नित्यं स याजुर्वेघं प्रयत्नतः ॥ १ ॥

भागवत श्रवण विधिः शतं भोज्याः इति स्कंधं स्वर्णं दद्याद्यथा वसु इति सिंहं सुवर्णस्य पलमानस्य सांबरं आ

चार्याय सुधीर्दत्वा मुक्तः स्यात् कर्मबंधनैः गायत्र्या हवनं कार्यं पायसेनाज्ययुतस्तथा तिलव्रीहिभिरेवात्र मता

व्याहृतयो यज्ञे हेमांते भगवान् विष्णुः पूज्यः स्वर्णमयः शुभः उपचारैः षोडशभिर्मंत्रैः पौरुषसंभवैः ततश्च

धेनुदानं च वक्त्रे देयं प्रयत्नतः एवं कृते विधाने च सर्वपापनिवारणे फलदं स्यात् पुराणं तु श्रीमद्भागवतं युगे

धर्मार्थकाममोक्षाणां साधनं नात्र संशयः अर्थवादान् वदंत्येव पौराणेषु च केचन न तथा भारते सम्यक्

इति भागवते जनैः विधान सहितं सम्यक् पुराणं फलदं भवेत् तस्माद्विधानयुक्तं तु पुराण श्रवणं मतं

इति भागवत श्रवण विधानं भागवतदानमंत्रः विष्णुभागवतं शांतं विष्णुभागवताय च ददाम्यहं मुक्तिकामः

स्वर्णसिंहासनारूढं हेमालंकारमंडितं पुस्तकं श्रीभागवतं ब्राह्मणाय ददामि ते देव

श्रीकृष्णः प्रीयतां मयि ॥ इति भागवत श्रवण विधानं श्रीरस्तु

क्रद्दं० इतिविधिः

दीडरवंडी साडेचार मण पावणे न पुरेर सवा तीन तोळे एकुनासा इडके [illegible]

न स्यमंतक मणेर्निस्य प्रसवाय

अधुना मधुकर पतिना गिलितो प्यपकारि दंपती येन त्रातः सदा सवः पायात् द्विगत विकारो

विनायको लक्ष्म्याः १

६

स्वयं पंचदिनं तिष्ठेद्दिनं भार्या दशां वरं॥ त्रिमंत्री वाहनं सप्त स्वर्णाप क्षोद्विरायु
धः॥१ छत्राभरण पाथेय पुस्तकायुध दर्पणं॥ निर्गमेषु प्रशंसंति दंडमानेश
तद्वयं॥२॥ वेश्यागारे वाणिग्गेहे भूसुराणां गृहेषु च॥ निर्गमेषु च यात्रायां दंड
मानेशतद्वयं॥३ गृहाद्गृहांतरे गारे दशहस्तेषु कश्यपः। शरक्षपो भरद्वाजो
वसिष्ठो नगराद्बहिः॥४ आसन्नक्षत्रमारभ्य दिननक्षत्र गण्यते। ग्रहे संख्या हरे
द्भागं शेषं वाहनलक्षणं॥१ रासभोअश्व हस्तीनां मेष जंबुक सिंहकः। काकोम
यूरहंसश्च इत्येवाहनं स्मृतं॥२ रासभो अर्थ हानिश्च धनलाभस्त वाजि
नः॥ लक्ष्मीप्राप्तिर्गजारूढो मेषेच मरणं ध्रुवं॥ जंबुको अश्वलाभाय स
र्वसिद्धिस्तथा हरिः। काको वानिःफलं कार्यं मयू रेणभवेत्॥ हंसश्च सर्वसिद्धिश्च
वाहनं फलमाप्नुयात्॥ ९॥

श्रीः अशौचनिर्णयः षण्मासाभ्यंतरेषु त्वपुरुषानिहिते गर्भमात्रे विनष्टे माता तावन्मास संख्या। सम
दिनमशुचिः स्नातशुद्धाः सपिंडाः अंते मासद्वये तु त्रिदिनमशुच पोतः परं वतिवत्स्या चातुर्वर्ण्यस्य तु
भेत्स्ये वलिनयसिय त्वोम तेषां चमात्रं १ जन्माशौचांतराले यदि शिशु नरानं नालछेद्यो पूर्ण काले निः
धाणोनिःपते द्यजननजनित माशौचमस्त्येवकृत्स्नं प्राङ्नालि छेदनाच्चे न्निधनमुपगतं मत्त्रयुह ५
णेय शुद्धिः सर्वेषां स्मृतिका यासिह च सकलकं प्रेतशुद्धिश्च सद्यः २ स्नानं प्राङ्नामतो वा गन्नेशे जने
नतोहः परे लेभिपडे त्वमापि सद्यः स्तुउपनि दिनमात्र्य ब्दतश्चौलश त्वे स्मश्चौ ते तु त्रिरात्रं त्रिदि
दग्धे नमित रथाप्याद्यताज्ञात्य शौचं माता पित्रो सुपुत्रे त्रिदिनमित्युपशाने संनिधौ नष्टचेष्टे ३ उन
ध्वब्देस्तु संकू जनिकर जननी सोदराणां दशाहं यद्वा स्पृश्य त्वमेवाधिकमिह विषये स्तत कंतु त्रिरात्रं स्त्रीपुस्ता
नेनरशु ध्येत्रिपुरुष विषये ज्ञाति राक्षेत्र कालाद र्वाग्वा ग्दानतो ङ्को त्रिरुपयमनाद्रूर्ध्वं गोत्रं स्वचक्र च ४
जन्मन्येपितम् सावपिन्दशनिशा द्वादशाहा निपक्षं मास वर्णाः क्रमेणा स्वच यद्विचितकट्टरजा
त्तिस्तुपक्षं वानप्रस्थे यतो चोपरमति कुले तेषं च केवा पुत्रस्या घोपि द्वोविप्र गुह्यस्मृतवर्ति चादिन
युद्धविद्धे च सद्यः ५ श्राव्वतीतिर्दशाह प्रभृतिविषयके प्राक्त्रिमासात्त्रिरात्रं पाक्षिण्या वष्ठमासाद्दिन
मिहनवमात्स्यात्ततः स्नानमात्रं स्नानं देशांतरस्थे त्वथपितृ विषये देशकालाविशेषात् स्वस्वं मातुः

६ सपत्न्यास्त्रिदिनमिदमिति कोसरशौचं समानं ६ पित्रोर्गृहे समद्धप्रसवमरणयोरेकरात्रं त्रिरात्रं
स्यातां पित्रादिकानामथ पितृमरणे व्यूढपुत्र्यास्त्रिरात्रं प्रेतेष्वाचार्यमातामहदुहितृसुतश्रोत्रि
यर्त्विक्सयाज्यस्वस्त्रीयेषु त्रिरात्रं त्रिदिनमशुचिकृत्तोदकस्तत्रयत्र ७ पक्षिण्याशौचमत्रि
कृदुहितृकृतसहाध्यायिबंधुत्रयांतेवासिभ्रातृसुमित्रश्वशुरभगिनिकाभागिनेयप्रयाणे मौ
तामह्यां च पित्रोः स्वसरि चाविरते मातुले मातुलान्यां चाथो सज्योतिरेव स्वविषयनृपतौ ग्राम
नाथे च नष्टे ८ शिष्योपाध्यायबंधुत्रयगुरुतनयाचार्यभार्यासगोत्रानूचानश्रोत्रियेषु स्वगृह
परमृतो मातुले चैकरात्रं रात्रिं सब्रह्मचारिण्यथ नु कथमपि स्वल्पसंबंधयुक्ते स्नानं वासोयु
तं स्यादिदमपि सकलं सर्ववर्णेषु तुल्यं ९ बह्वाशौचस्य मध्ये त्वपरमपि समं स्वल्पकं वा सजा
तिश्चेतज्ज्ञातरं वा यदि भवति तदा पूर्वशेषेण शुद्धिः छाद्यां तद्रात्रिशेषे त्रिभिरपरदिनैर्यामि
नीयामशेषे नैव चेत्पूर्वास्त्वेन पित्र्यं पितुरुपशमने पक्षिणी मातृमृत्यौ १० सर्वं चाशौचमंत
पर्णे स्नात्वा सचैलं विहितदहितकृता बर्हिकः सूतिकायां त्रिंशद्रात्रं न योग्या पितृसुरकर

णे विंशतिः पुत्रसूस्तु ११ निर्हृत्यान्यं श्मीतं दिवसमशुचिकौ थालवर्णीतदुक्तं शेषे चोयानाथनाथ
घकृतुफल शतफलभागाप्नुवेनैव शुध्येत् नीत्वोपाध्यायमातापितृपरमगुरून् ब्रह्मचारी न दोषी
तेभ्योन्यं निर्हृतोस्य व्रतमपि विततं भ्रश्यतेवश्यमेव १२ तुल्योत्कृष्टानुयाने वसनसहितको
भस्य याप्लुत्य वह्निं स्पृष्ट्वाज्यं प्राश्य शुध्येद्दधि दिनमशुचिर्हीनवर्णानुयाने पक्षिण्येकांतरानुव्र
जन इह सैवद्यांतरेत त्रिरात्रं कुलास्त्वात्वात्सुनद्यां मसुयमनयातं सपिंडाशं च कुर्युः १३ ज्ञातां
बाचार्यकेभ्यो नलजलतिलदो ब्रह्मचारी तदीयाशौच्यन्येष्वस्तु तद्वत्सुनरुपनयनं वाधिकं
कारयेत्तत् अन्येत्वसातिकेभ्यो यदि ददाति तदा तत्र युक्ताः शुभास्युः कुर्युः कृच्छ्रत्रयं वाधम
दहनविधौ तंतमेवाप्नुवंति १४ इत्याशौचप्रकरणम्
आचतुर्थाद्विवाहाग्निनश्येद्दुल्लोदनावधि अयाश्वपंचहोतादप्कल्पेप्रसंचयं तं इति
दर्पणे॥ ॥ गोशतादपि गोक्षीरं प्रस्थं प्रस्थशतादपि प्रासादं मंचकस्यार्थे शेषाः परविभूतयः प्रारब्धकर्मप्राबल्याज्ज्ञानिनोपि विभाति वै
सार्वभौमो यथा राजा स्वच्छंदं वर्तते भुवि प्रारब्धकर्मणा ज्ञानी स्वच्छंदं वर्तते तथा
गृहस्थः पंक्तिभेदेन पात्रभेदेन मस्करी नारी पुरुषभेदेन रौरवं नरकं व्रजेत्

८ यादि क्लिश्यतेचसदा दुःखं भुंक्ते विशिष्ट हीनयद नयथेष्टान्य रणं तस्य रागा केनचिदिष्यते आसनप्राणा
यामैरकारितः प्रत्याहारेणपुष्पितः धारणाध्यानसमाधिभिः फलितिप्रात्यी तिदिक ॥२॥
खद्योतोद्योतयेत्तावद्यावन्नोदयते शशी सहस्रांशुश्चोदयेतेनखद्योतार्कचंद्रमाः ॥ नास्ति समुद्धनिद्रालु निर्जंमोह
श्वरं महः दृशात त्वानुवर्तित्यापश्यामिं तं निमग्नया ॥ यदास्त्वायमहानंदसंदीकृतमनाः सदा निद्रालु रिविदेव
शिदुग्धाब्धोवतिभातिते ॥ गीतामाहात्म्ये पंचरात्रिपंचजानीहि पंचाध्यायानुक्रमात् दशबाहुं तथा
चैक मुदरं षट्पदांबुजे एवमष्टादशाध्यायीवाङ्मयीमूर्तिरीश्वरी ज्ञानीहि ज्ञानमात्रेणमहापातकनाशिनी ॥
संन्यासविषये ब्राह्मपुराणे संन्यासिनोप्यब्दिकादिपुत्रः कुर्याद्यथातिथि महा
लयेलुप्त श्राद्धं द्वादश्यां पार्वणेन तु ॥ मदनपारिजाते उपोष्य शुद्धापूर्व तिलपात्रं
निर्मितं ... ब्राह्मणवादिभ्यः प्राजापत्येततलमं तिलपात्रं त्रिधाप्रोक्तं कनिष्ठोत्तममध्यमं ताम्र
पात्रं दशपलं जघन्यं परिकीर्तितं द्विगुणंमध्यमंप्रोक्तं त्रिगुणं चोत्तमं स्मृतं प्राजापत्ये तु गामे
कस्यात्स्यात्तपनेद्वयं पराक तप्तातिकृच्छ्रे तिस्रस्तिस्रस्तु गास्तथा वासिष्ठ श्रोणि स्त्रियाः पातकानि
लोके धर्मविदो विदुः भर्तुर्वधो भ्रूणहत्या स्वस्य गर्भनिपातनं व्रतस्त्वस्तु परिसाज्या: शिष्ट
गामृगास्तथा पति [illegible] विशेषेण जुंगितोपपन्नयातुया जुंगितः प्रतिलोमतः

शिंकाप्रश्नः रविवारादिषु रवेर्दिशाः शिंकाफलं ब्रुवे विघ्नं कलिर्धनलाभस्तोषोवार्तैषदर्शनं अर्थलाभोभोजनं च चंद्रवारेब्रवी
म्यथ भुक्तिर्विलंबोमस्तुश्च शुभवार्तासुखवार्तिकृत् कलिरीक्षणं लाभोभौमवारेवदाम्यथ लाभोभुक्तिर्विलंबिश्च मरणं प्रवदना
ग्नेय ३ तोषः कलिः प्रियस्त्रावसौम्यवारेफलं शृणु ईक्षाशुभवार्ताविभुक्तिर्लाभोमृतिस्तथा अर्थनाशोर्थलाभश्चकार्येक्तानि
रयोगुरो कलिरीक्षणंलाभोभोजनं च विलंबनं ५ मृतिसंतोषोर्थनं भार्गववासरे प्रथ तोषाविलंबेपरवीक्षे लाभोभुक्तिः
कलिर्मृतिः ६ इत्यात्मार्थनाशश्च प्रोच्यते अथ शनेर्दिने नाशस्तोषोविलंबश्च कार्यसिद्धिः पराजयः ७ संतोषत्रितयं प्रोक्तं
भास्कराद्यादिषु श्रुतिः दिग्वारजफलं प्रोक्तं दिक्षुयामफलं ब्रुवे ८ लाभोग्निभीभुक्तिः स्वामीभयं यामेषु पूर्वतः स्वर्णाय
नं च लाभश्च कलियामेषु वह्निजः लाभोयस्तंभयं कालि यामेषु दिशिदक्षिणे लाभोमैत्रेक्षणं स्वर्णं लाभोन्नागमस्तु नैरृते
गमस्तोषोलाभधनलाभो यामेषु पश्चिमे अन्नं दुःस्वप्नगमने धनं यामेषु वायुतः ॥ विघ्नं स्वामीक्षणं संगः कलियामेषु वा
त्तरे सन्मानं नाभिबाधाश्च धनमीशेप्रकीर्तिता १२ इति शिंकाप्रश्नः संपूर्णः
विस्तारितं मकरकेतनधीवरेण स्त्रीसंज्ञि
तं बडिशमत्र भवांबुराशौ येनाचिरात्तदधरामिषलोलमर्त्यान्मत्स्यान्विकृष्य च पचत्यनुरागवह्नौ ॥ अनुकू
लोनिर्मलांगी कुलजा कुशला सुशीलसंपन्ना पंचलकारा भार्या पुरुषः पुण्योदयाल्लभते ॥
जन्मनि द्वादशे चैव चतुर्थे नवपंचमे स्थितश्च शनिः सदा कुर्याद्देहपीडाधनक्षयं ॥ धराहिरण्यगोर
तुं कस्यमृतनामासिसदा त्वं केशवप्रिये केशवार्थे विचित्राभि वरदा भवशोभने शिवनिर्माल्यं
तनामरैषणांशुकादिकान् विहाय शेषं निर्माल्यं चंडेशाय निवेदयेत् ॥

नसजेकूमे मर्यादामपि केशरध्यंगतः वामदेवः शुनो आणिपत्का धर्मं च चास्यत्‌ तदर्थे त्वक्‌ अवर्त्या शुनः०

श्री: अवर्त्या शुनश्चक्‌ वामदेवोऽहं अवर्त्या जीवितोपायरहितेन शुनः शुनकसंबंधीनी आंत्राणि पुरीतंति पेचे अपचं देव
षु धोतमनेष्वन्नयाप्यादिकुमध्ये इंद्रादन्यं मर्डितारं सुसुखयित्वतारं न विविदे न लेभे किंच जायां स्वभार्यां तु अमहीयमानां
अश्लाघनीयां अपश्यं अद्राक्षं अथ: अथानंतरं श्येनः श्येनवच्छीघ्रगामी इंद्र: मम मह्यं मधुमधुरोपेतं उदकं आजभार आजहार
मधु पुरीषघ्नति तन्नाम सुपाठात्‌ इति देवानां करदा विप्रा विप्राणां करदा नृपाः नृपाणां करदा लोका लोकानां करदा मही
अनात्मसु तेदेहादौ आत्मबुद्धिस्तु देहिनां सो विद्या तत्कृतो बंधस्तन्नाशो मोक्ष उच्यते इत्यात्मतत्त्वे अत्रार्थे त्वक्‌ गर्भेनुस
न्नेवेषा० त्वक्‌: श्यानाभावं समास्थाय गर्भाद्योगेन निःसृता सर्षिर्गर्भे शयानः सन्‌ ब्रूते गर्भे नु सन्निति गर्भे नु
गर्भ एव सन्‌ विद्यमानोऽहं वामदेवः एषां इंद्रादीनां देवानां विश्वा विश्वानि सर्वाणि जनिमानि जन्मानि अन्ववेदं आ
नुपूर्व्येण आज्ञासिषं परमात्मनः सकाशात्सर्वे देवा जाता इत्यवेदिषं इत्यर्थः इत्पूर्वं शतं बहूनि शतं सहस्रं इति
तन्नाम आयसीः अयोमयानि अभेद्यानि पुरः शरीराणि मा मां अरक्षन्‌ अपालयन्‌ यथा अहं शरीराद्यात्म
त्वं मा त्यानं न जानीयां तथा मां अरक्षन्नित्यर्थः अथ अधुना श्येनः श्येनवत्‌ स्थितोऽहं जवसा वेगेन निरदीयं श
रीरान्निरगमे अनावरणमात्मानं जानन्‌ निर्गतोऽस्मीत्यर्थः पुरुषो वा अयमादितो इति रवदे गर्भ एवैतच्छया
नो वामदेव एवमुवाचेत्यादिना यमर्थः सम्यक्‌ प्रतिपादितः साधूनां दर्शनात्पापो विपद्‌गणः जायते सर्पीणां पङ्जना
इ त्ती पुरुकुत्सान्यग्रा स्तुतं अस्मिन्नतपदारुद्‌ पुम्या नैवावमानयत्‌ इरावमनतत्तेज इक्ष्वाकुमनेनाशाहि विख्याति
यास्तक्‌ अयमग्निः [illegible] ज्योतिषा तेजसा बृहता महता विभाति विशेषण दीप्यते अथ तथाभूत! समाहितो स्वमहित्वेन विश्वानि सर्वाणि पदार्थ
जातानि आविष्कृरुते प्रकाशीकुरुते एवं प्रदीप्ति अदेवीः अदेवनशीला आसुरी माया दुरेवाः दुःखगमनाः प्रसहते अभिभवति प्रपेरसूत
स्यज्ञातिलोऽन्यं इतिया स्क: यद्वा दुरेवा इत्यग्निविशेषणं दुरेवाः दुःखा दुस्तपे: नसगते सा हि रक्षि दुरवाभवति दुःसर्प: इतिया स्क: किंच शि
शीते यद्‌ यथाहि स्तप स्तपानि धूव शृंगे तीक्ष्णीकरोति एवं अग्निरपि दारूणि दुहं तीक्ष्णीकरोति ज्वाला: शृंगसदृशी: किमर्थं
रक्षसे विनिक्षे रक्षसो नाशनाय नहत्थे चतुर्थी हिंसनायेत्यर्थः न यतिश [illegible] आपाय यामं एवं हरी: आपफतेनर्द

तुल्य एवाधिकारस्याद्‌ दंपत्योः [illegible] अप्यो भिथिः कर्तव्यत्वतयो: तुल्यं द्रव्यसाधने प्रचक्षते अशक्ता याजमान्यं वे सली कर्मैवलुप्यते
नतावता क्रतुरिषः स्यादधर्वणस्त्वतः सांगं तु सर्वथा कुर्यात्तत्राप्यन्यतरस्तयोः उभावप्यसमर्थौ चेल्लिप्सुकः कश्चन सञ्जेत्‌
संनिधाय यत्नमानः स्यात्‌ उद्देशसागकारक: असन्निधौ तु पत्नी दध्वर्युस्तत्स्वकुरुपा पत्यारजस्वलायां वा प्रसूताया मथापि वा
सर्वमेव नियुक्तः सन्कुर्याद्दक्षिणयो वितं प्रयोगमध्ये अध्वर्योर्यत्मानस्य वा आशौचे प्राप्ते यावत्प्रयोगसमाप्तिर्निषिद्ध:
इति होम प्रकरणे त्रयो दश पत्रे आधानं पत्न्या त्त्रेणातेनै वेल्यादिका: क्रिया: अन्यथा म [illegible] ते फलं य त्र त्रय कृति यद्ग
कांडे प्रक्रांतमग्निहोत्रादिकर्म यत्कृति चोदितं आर्त्तवाभिप्लुतां पत्नीं विहाय कुरुते द्विजः इष्ट्यामारभणीयायां प्राकृते पैत्र
तीर्थेषु व्रतादूर्ध्वमृतं दृष्ट्वा कुर्यात्कार्यं न लोपयेत्‌ इति प्रदीपिका माधवः त्रिरात्रेणेति श्रौतकर्मणां स्नानादिने ष्वनुष्ठा
नमिति सिद्धांतात्‌ ॥ इस्तु प्रकृतं वै विकृतौ हि कालां तराख्ये द्वितीयादि प्रयोगे संकल्पात्सर्वमना लंभुकायां विरम्य कालांतरे कुर्यात्‌
त्‌ संकल्पादूर्ध्वं चेदन्वाधान प्रमृत्युप कृध्य समापयेत्‌ यो धात्मसह पांसवं प्रति लोमाप लक्षणं उत्क्रम्य गृह्येणेन्दु गस्य
तेसूतिकापि कृ चा ॥ स्वशास्त्रं विधमाने यः परशास्त्रेण वर्तते भ्रूणहत्या समं तस्य स्वशास्त्रमवमन्यते तस्मात्स्वतन्त्र
स्वश्रुतिं सर्वथा नैव लंघयेत्‌ प्रथमः प्रथमकल्पस्य योऽनुकल्पेन वर्तते स नाप्नोति फलं तस्य परत्रेति श्रुति स्मृति:

प्रथु इक्ष्वाकी काङ्‌ स्वधान्यं दर्शिंते प्रसिद्धः

व्रीहयश्च यवाश्चैव गोधूमा अणवस्तिला: प्रियंगवा विदारश्च कोरदूषा: सचीनका: माषा मुद्गा मसूराश्च व्रीहय:

निष्पावा: सकुलित्थका: आढक्यश्चणकाश्चैव सणा: सप्तदशस्मृता: इति विष्णुपुराणे अपधय: श्यामाकास्त्वथ नीवारा जर्तिला:

सयवामाषा: गोधूमाअणवस्तिला: प्रियंगु: सप्तमासेता अष्टमस्तु कुलित्थक: स्वयंजातस्तिला

सर्वत्राग्निहोत्रादावनादिष्टप्रायश्चित्ते मनस्वतीं जुहुयात् मनोज्योतिरि० चतुर्विंशति प्रायश्चित्तप्रदीपे
श्रौते आशौचादौ कर्तव्याकर्तव्यानि   अन्वारंभणीयायां प्रक्रांतायां संकल्पानंतरं अनालंभुकायां अपरुध्य समाप
येत् केचिदन्वाधानादूर्ध्वं चेत्तामपरुध्य समापयेत् इत्याहुः दर्शपूर्णमासयोर्विशेषो वक्ष्यते दर्शपूर्णमासयोः
प्रथमप्रयोगे संकल्पात्पूर्वमनालंभुकायां विरम्य कालांतरे कुर्यात् संकल्पादूर्ध्वं कर्मारंभात्पूर्वमनालंभुकायां अ
न्वाधानप्रभृत्यपरुध्यैव कुर्यात् समापयेत् द्वितीयादिप्रयोगे संकल्पात्पूर्वमनालंभुकायां संकल्पप्रभृत्यप
रुध्यैव समापयेत् एवं विकृतीष्टिष्वप्याग्रयणचातुर्मास्यपशुबंधेषु भवति   अन्ये त्वाहुः प्रथमप्रयोगे
संकल्पादूर्ध्वमन्वाधानात्पूर्वमनालंभुकायां विरम्य कालांतरे कुर्यात् अन्वाधानादूर्ध्वं चेदपरुध्यैव समापयेत्
द्वितीयादिप्रयोगे संकल्पात्पूर्वमनालंभुकायां विरम्य कालांतरे कुर्यात् संकल्पादूर्ध्वं चेदन्वाधानप्रभृत्यपरुध्य स
मापयेत् केचिदन्वाधानादूर्ध्वं चेत्तामपरुध्य समापयेदित्याहुः एवं विकृतीष्टिपशुचातुर्मास्येष्वपीति प्रायश्चित्त
प्रदीपे   आशौचमध्ये कार्याकार्यविचारः श्रौतं कर्म नित्यं कार्यं स्नातः शुचिमवाप्नुयात् होमं तत्र प्रकुर्वीत शुष्का
न्नेन फलेन वेति यत्पार्श्वे   रजोदोषसमुत्पन्ने सूतके मृतकेऽपि वा नित्यनैमित्तिकं कुर्यात् काम्यं कर्म न किंचनेति त्रिकां
डमंडनः आधानं पुनराधानं पशुः सौत्रामणी तथा चातुर्मास्यानि सोमश्च तथैवाग्रयणक्रिया अकाम्यान्यपि नैतानि
सूतकादौ [illegible] कर्तव्यान्येव चैतानि कारितान्यथशापतः पतिता
नैव कुर्वीत शास्त्रीयं कर्म किंचन प्रारब्धमपि सज्जायाद् [illegible] रजोदोषसमुत्पन्ने सूतके मृतकेऽपि वा प्र
वसन्नग्निमान्विप्रः पुनराधानमर्हति   अप्रजाता गुर्विणी वंध्या विरक्ता च रजस्वला नाश्नीयान्मध्यमं पिंडं जारिणी
वह्निसूतिका   इतीतरप्रायश्चित्तं   कल्पं वा स्वरशोकं यस्य पत्नी कर्मे चोदितं तस्य तावति शास्त्रार्थे कृते सर्वं कृतं भवेत्

क्लिश्यंते शिशवः स्ववस्त्रसदनं पंकान्वितं चांगणं शय्या दंशवती कदन्नमशनं धूमेन पूर्णं गृहं भार्या निष्ठुर
भाषिणी पुनरपि क्रोधो धरद्दृष्टिः सदा स्नानं शीतलवारिणा प्रतिदिनं धिग्धिग्गृहस्थाश्रमः
एकादशी   त्रयोदश्यां न लभ्येत द्वादशी यदि किंचन उपोष्यैकादशी तत्र दशमीमिश्रितापि चेति स्कांदे अवि
द्धानि निषिद्धैश्च न लभ्यंते दिनानि तु मुहूर्तैः पंचभिर्विद्धा ग्राह्यैवैकादशी तिथिरिति सव्यशरंगः मुहूर्तैः पं
चकं अरुणोदयमारभ्य अरुणोदयस्तु उदयात्प्राक् घटीचतुष्टयं एवं सूर्योदयात्त्रिमुहूर्तो वेध इत्यर्थः
उद्योगः साहसं धैर्यं बुद्धिः शक्तिः पराक्रमः षडेते मनुष्य चिंतायां सप्तमं दैवचिंतनं   [illegible]
शार्वितः [illegible] इति [illegible] कवेः [illegible]
[illegible] कवेः अंधः पश्यति मध्यरात्रिसमये पूर्णं रवेर्मंडलं इति समस्या
समुद्रोऽसि निक्षेप्यो कंठे बध्वा दृढं शिलां धनवंतमदातारं दरिद्रं चातपस्विनं
प [illegible] वित्रवंतश्च यदि जीर्णं यत्तत्र वेदांतविद् [illegible] पर ब्रह्मसूत्रं॥ आयुष्यमग्र्यं प्रतिमुंच शुभ्रं
ज्ञोपवीतं विसृजेत्तु तेजः॥ २ अपुत्रिणी मृता कुर्यात्तस्या भर्ता विवाहके पुत्रमाद्येऽपुत्र
मासेच विवाहः शुभदामतः स्मृतिरत्नाकरे

सामंधात्। प्रयंग। रुद्रावासइतिप्रोक्तं अविमुक्तं यतोद्भवं श्मशानं तेन शिवः प्रोक्तं श्मशानं शयनमुच्यते निर्वचंति श्म-
शानार्थं मुनयः शब्दार्थकोविदाः महांत्यपि च भूतानि प्रलये समुपस्थिते शेरतेऽत्र शवा भूत्वा श्मशानं तु ततो महत्
वाराणसीति काशीति रुद्रावास इति द्विज महाश्मशानमित्येवं प्रोक्तमानंदकाननं बलिणं रुद्राः बध्वा
स्वर्णेन रुद्राक्षं रजतेनाथवा मुने शिखायां धारयेन्नित्यं कर्णयोर्वा समाहितः यज्ञोपवीते हस्ते वा कंठे तूदरेऽथवा नरः
श्रीमत्पंचाक्षरेणाथ प्रणवेनैव वाथवा आत्ममंत्रेण मेधावी रुद्राक्षं धारयेत्सुदा रुद्राक्षधारणं साक्षात् शिवज्ञा-
नस्य लक्षणं रुद्राक्षं यत्सु शिखायां तत्परतत्त्वमिति स्मरेत् कर्णयोरुभयोर्ब्रह्मन्देवदेवं च भावयेत् यज्ञोपवीते
देवांश्च तथा हस्ते दिशः स्मरेत् कंठे सरस्वती देवी पावकं चापि भावयेत् सर्वाश्रमाणां वर्णानां रुद्राक्षाणां च
धारणं कर्तव्यं मंत्रतः प्रोक्तं द्विजानां मन्यवार्णानां स्कांदे प्रक्षाल्य गंधतोयेन पंचगव्येन चोपरि शिवांभ-
सथ्य प्रक्षाल्य श्रीरुद्रेणाभिषेचयेत् रुद्राक्षाणां प्रतिष्ठेयं प्रोक्ता वैदिक संमता शिवधर्मे नविक्रेतिर्य-
रुपमात्रे नोगे रुद्राक्षधारणं नशंभोर्भवनेपूजा सविप्रश्वपचाधमः खादन्मांसं पिबन्मद्यं संगतो-
ऽप्यत्यजानपि सर्वतिरक्तिपापात्मा रुद्राक्षशिरसि स्थिते सर्वयज्ञतपोदानवेदाभ्यासैश्च यत्फलं तत्फलं
लभते सद्यो रुद्राक्षस्य तु धारणात् प्रयाणकाले रुद्राक्षं बद्धापि म्रियते यदि सरुद्रत्वमवाप्नोति सकृत्स-
माप्नोति पुनर्जन्म न विद्यते॥

अथ भट्टोजिदीक्षितरचिताह्निकोक्तवचनानि प्रातर्मुहूर्तत्र्यानि प्रासांपुण्यक्षयकारिणी तां करोति तु ये मोहात् सापकृच्छ्रेण शुध्यति
दिवा संध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः कुर्यान्मूत्रपुरीषे तु रात्रौ चेद्दक्षिणामुखः कर्णश्च्युतदक्षे कृत्वा यज्ञोपवीतं तु पृष्ठतः कंठ-
लंबितं विण्मूत्रं तु गृही कुर्याद्यद्वा कर्णे समाहितः इत्यंगिराः यद्येकवस्त्रो यज्ञोपवीतं कर्णे कृत्वा मूत्रपुरीषोत्सर्गं कुर्यात् इति संख्याय-
नीयं छायायामंधकारे वा रात्रावहनि वा द्विजः यथासुखमुखः कुर्यात् प्राणबाधाभयेषु च गृहीत्वा जलपात्रं तु विण्मूत्रं कुरुते यदि
तत्कालं मूत्रसदृशं पीत्वा चांद्रायणं चरेत् अथापकृष्य विण्मूत्रं लोष्ठकाष्ठतृणादिना उद्धृतवासा उत्तिष्ठेद् दृढं विधृतमेहन इति भरद्वाजः
उद्धृतवासा उत्क्षिप्तवासाः यस्मिन्देशे तु यत्तोयं या च यत्रैव मृत्तिका सैव तत्रैव शस्ता स्यात्तया शौचं विधीयते इति मनुः तत्र वल्मीकमूषक-
उत्खातां मृदं मंतर्जलां तथा शौचावशिष्टां गेहाच्च नादद्यात्कूपसंभवां इति विष्णुपुराणं धर्मविद्दक्षिणा हस्तेनाधः शौचं न योजयेत्
तथा च वामहस्तेन नाभेरूर्ध्वं न शोधयेत् देवलः एका लिंगे गुदे तिस्रस्तथैकत्र करे दश उभयोः सप्त दातव्या मृदः शुद्धिमभीप्सता इति
मरीचिः तिस्रः शिश्ने तला सादौ शौचे गुल्फौ तथैव च हस्तो वा मणिबंधाद्वा लेपगंधापनुत्तये एतच्छौचं गृहस्थस्य द्विगुणं ब्रह्मचारिणः
वानप्रस्थस्य त्रिगुणं यतीनां तु चतुर्गुणं यद्दिवा विहितं शौचं तदर्धं निशि कीर्तितं तदर्धमातुरे प्रोक्तं आतुरस्यार्धमध्वनि इति स्कांदे
यावत्तु शुद्धिं मन्येत तावच्छौचं विधीयते प्रमाणं शौचसंख्याया न शिष्टैरुपदिश्यते इति देवलः परस्य शोणितस्पर्शे रेतोविण्मू-
त्रैके तथा चतुर्णामपि वर्णानां द्वात्रिंशन्मृत्तिकाः स्मृता इति मानवीयं कुर्याद्द्वादशगंडूषान् पुरीषोत्सर्जने द्विजः मूत्रे चैव त्वा-
रएवस्युर्भोजनांते तु षोडश आचार्येः गायत्र्यष्टशतं चैव प्राणायामत्रयं तथा प्रायश्चित्तमिदं प्रोक्तं निस्समाति क्रमेसति
इति स्मृतिरत्नावल्यां हृद्गाभिः पूयते विप्रः कंठगाभिस्तु भूमिपः वैश्योऽद्भिः प्राशिताभिस्तु शूद्रः स्पृष्टाभिरंततः इति मनुः आयतं सर्वतः
कृत्वा गोकर्णाकृति करं मुक्तांगुष्ठकनिष्ठेन शेषेणाचमनं चरेत् अभ्यस्तं संहतांगुलिः माषमज्जनमात्रास्तु संगृह्य त्रिः पिबेदपः
इति भरद्वाजः प्रक्षाल्य पादौ हस्तौ च त्रिः ती पिबेदंबु वीक्षितं सम्यगंगुष्ठमूलेन द्विः समृज्यात्ततो मुखं संहताभिस्त्रि-

मिः पूर्वं आस्यमेवमुपस्पृशेत् अंगुष्ठेन प्रदेशिन्या घ्राणं स्पृष्ट्वा त्वनंतरं अंगुष्ठानामिकाभ्यां च चक्षुः श्रोत्रे ततः परं कनिष्ठांगुष्ठयोर्ना
भिं हृदयं तु तलेनैव सर्वाभिश्च शिरः पश्चाद्बाहू चाग्रेण संस्पृशेत् अनेनैव विधानेन आचांतः शुचितामियात् अशक्तौ त्रिः पीत्वाऽ
स्तोऽप्यक्षाल्य श्रोत्रं स्पृशेत् अकृत्वा पादशौचं तु तिष्ठन्मुक्तशिखोऽपि वा विना यज्ञोपवीतेन आचांतोऽप्यशुचिर्द्विजः इति मूलं आचामा
भावे कुर्वीतालंभनं वापि दक्षिणश्रवणस्य चेति मार्कंडेयः दंतलग्ने फले मूले भुक्तस्नेहावशिष्टके तांबूले चेक्षुदंडे च नोच्छिष्टो भ
वति द्विजः इति गौतमः जान्वोरूर्ध्वं जले तिष्ठन्नाचांतः शुचितामियात् अधस्ताच्छतकृत्वोऽपि समाचांतो न शुध्यति इति हारीतः आर्द्रवा
सा जले कुर्यात्तर्पणाचमनं जपं शुष्कवासाः स्थले कुर्यात्तर्पणाचमनं जपं इति कौशिकः प्रतिपद्दर्शषष्ठीषु चतुर्दश्यष्टमीषु च द्वादश्यां
नवम्यां च वर्जयेद्दंतधावनं इति वैष्णवः दीक्षितो ब्रह्मचारी च यतिश्चैव विधवांगना निसमदादंतकाष्ठं अमायां तु विवर्जयेत् कुशा
काशास्तथा दूर्वा यवा व्रीहय एव च बिल्वजाः पुंडरीकाणि सप्तसार्वर्हि रुच्यते इति यमः त्रिभिर्दर्भैः शांतिकर्मे पंचभिः पौष्टिकं तथा
चतुर्भिराभिचारं तु कुर्वन् कुर्यात् पवित्रकं इत्यत्रिः उषस्युषसि यः स्नानं संध्यायामुदिते रवौ प्राजापत्येन तत्तुल्यं सर्वपाप
प्रणाशनं गुणा दश स्नानपरस्य साधो रूपं च तेजश्च बलं च शौचं आयुष्यमारोग्यमलोलुपत्वं दुःस्वप्ननाशश्च यशश्च मेधा
अस्वंहोऽदकस्नानं विप्रपादाभिषेचनं आदित्याभिमुखः कुर्यात्संध्यावंदनमेव च इति योगयाज्ञवल्क्यः स्वयं धौतेन कर्तव्या
क्रियाधर्म्या विपश्चिता न तु नेजकधौतेन नाहतेन न कुत्रचित् विकच्छो नुत्तरीयश्च नग्नश्चावस्त्र एव च श्रौतं स्मार्तं तथा कर्म न न
ग्नश्चिंतयेदपि नग्नः स्यान्मलवद्वासा नग्नः कौशेयकेवलः नग्नो द्विगुणवस्त्रः स्यात् नग्नो दग्धपटस्तथा नग्नश्च स्यूतवस्त्रः स्यान्न
ग्नोऽग्रंथितवस्त्रकः नग्नश्चैव कुवस्त्रः स्यान्नग्नः कौपीनकेवलः काषायवस्त्रः साक्षाच्च दर्भान्नग्नः प्रकीर्तितः होमे देवार्च
नाद्यासु क्रियासु पठने तथा नैकवस्त्रः प्रवर्तेत द्विजो नाचमने जपे निष्पीड्य स्नानवस्त्रं तु पश्चात्संध्यां समाचरेत्
अन्यथा कुरुते यस्तु स्नानं तस्याफलं भवेत् इति मनुः स्नानं तु द्विविधं प्रोक्तं गौणमुख्यप्रभेदतः तयोस्तु

वारुणं मुख्यं तस्य पुनः षड्विधं भवेत् आग्नेयपुराणे नित्यं नैमित्तिकं काम्यं क्रियांगं मलकर्षणं क्रियास्नानं तथा षष्ठं षोढा स्नानं
प्रकीर्तितं चांडालशवयूपादि स्पृष्ट्वा स्नातां रजस्वलां स्नानार्हस्तु यदा स्नाति स्नानं नैमित्तिकं हि तत् पुष्यस्नानादिकं यत्तु
दैवज्ञविधिचोदितं तद्धि काम्यं समुद्दिष्टं नाकामस्तत्प्रयोजयेत् मलापकर्षणं नाम स्नानमभ्यंगपूर्वकं मलापकर्षणार्थाय
प्रवृत्तिस्तस्य नान्यथा सरस्सु देवखातेषु तीर्थेषु च नदीषु च क्रियास्नानं समुद्दिष्टं स्नानं तत्र मता क्रिया इति शंखः प्रा
तर्मध्याह्नयोः स्नानं वानप्रस्थगृहस्थयोः यतेस्त्रिषवणं पुण्यं सकृत्तु ब्रह्मचारिणः इति दक्षः मंत्रपूतजले स्नानं प्राकृतः प्रा
नं फलप्रदं न तथा वारिमग्नानां यादसामिव तत्फलं व्यासः स्नानविशेषे गृह्यपरिशिष्टे मूलं चितिं च चितिकाष्ठं च यूपं चां
डालमेव च स्पृष्ट्वा देवलकं चैव सवासा जलमाविशेत् बौद्धान् पाशुपतान् जैनान् लोकायतिककापिलान् विकर्मस्थान् द्वि
जान् स्पृष्ट्वा सचैलो जलमाविशेत् कापालिकांस्तु संस्पृश्य प्राणायामोऽधिको मतः देवलकलक्षणं देवार्चनपरो विप्रो वित्तार्थी
वत्सरत्रयं स वै देवलको नाम हव्यकव्येषु गर्हितः इति रत्नावल्यां महानिशा तु विज्ञेया मध्ययामद्वयं निशि तस्यां स्नानं न कुर्वीत
काम्यनैमित्तिकादृते इति व्यासः रात्रौ स्नानं यदि भवेत्सद्योऽग्नौ समाचरेत् स्वर्णगुलिकरो विप्रो वह्निना वा विना चरेत् इत्यत्रिः
प्रदोषे पश्चिमे यामे दिनवत्स्नानमाचरेत् इति व्यासः अस्पृश्यस्पर्शने जाते अश्रुपाते क्षते भगे स्नानं नैमित्तिकं कार्यं दे
वपित्र्यविवर्जितं पराशरवचनं देवपित्र्यसर्पितिपवारहितं इत्यर्थः मृते जन्मनि संक्रांतौ श्राद्धे जन्मदिने तथा अस्पृश्यस्पर्शने
चैव न स्नायादुष्णवारिणा इति मनुः पुष्ये च जन्मनक्षत्रे व्यतीपाते च वैधृतौ अमायां तु नदीस्नानं पुनात्यासप्तमं कुलं पु
लस्त्यः चैत्रकृष्णचतुर्दश्यां यः स्नायाच्छिवसंनिधौ न प्रेतत्वमवाप्नोति गंगायां च विशेषतः शिवलिंगसमीपे तु मुच्यते
सर्वकिल्बिषैः ज्येष्ठमासि सिते पक्षे दशम्यां हस्तसंयुते दशजन्माघहा गंगा तेन पापापहा स्मृता बालाश्च तरुणा वृ
द्धा नरनारीनपुंसकाः स्नात्वा माघे शुभे तीर्थे प्राप्नुवंतीप्सितं फलं माघमास्युपसिस्नात्वा विष्णुलोकं स गच्छति विष्णुः

पंचदश्यां चतुर्दश्यां अष्टम्यां रविसंक्रमे द्वादश्यां सप्तमीषष्ठ्यो तैलस्नानं विवर्जयेत् नचकुर्यात्तृतीयायां त्रयोदश्यां ति
थौ तथा नवम्यां च दशम्यां च क्षेममिच्छन् हि पांडव इति गर्गः वृथा तु उष्णोदकस्नानं वृथा जाप्यमवैदिकं वृथा त्वश्रोत्रिये दा
नं वृथा भुक्तमसाक्षिकं याज्ञवल्क्यः आदित्यकिरणैः पूतं पुनः पूतं च वह्निना आम्नातमातुरस्नानं न प्रशस्तं हि रोगिनां
इति यमः आपः स्वभावतो मेध्याः किं पुनर्वह्नियोगतः अतः संतः प्रशंसंति स्नानमुष्णेन वारिणा मलं असामर्थ्याच्छरीरस्य
कालशक्त्याद्यपेक्षया मंत्रस्नानादिकं ज्ञेयं मुनिभिः शौनकादिभिः अथैतत्परिज्ञाते आपोहिष्ठादिभिर्मंत्रैर्न्यचलं भस्मनापार्थिवं
आग्नेयं भस्मना स्नानं वायव्यं गोरजः स्मृतं यत्तु सातपवर्षेण स्नानं तद्दिव्यमुच्यते अवगाहो वारुणः स्यात् मानसं विष्णुचिंतनं पार्थि
ज्ञाने विद्यासरस्वतीप्रोक्तं स्नानं सारस्वतं विदुः अशक्तानां तु जंतूनां गुरोः पादोदकं शुभं गोपीचंदनलिप्तांगो यं पश्यति च कृष्णमा
ततं मुहूर्तं विज्ञानीयात् तत्र कार्यविचारणा अशुचिर्वाप्यनाचारो मनसा पापमाचरन् शुचिरेव भवेन्नित्यं ऊर्ध्वपुंड्रांकितो नरः
इति सारसंग्रहे जलेन तिलकं कुर्यात् कल्लोलात् कूर्मसिद्धये स्नात्वा स्नान्ते तु तिलकं कृत्वा चैव तु भस्मना देवानभ्यर्च्य गंधेन स
र्वपापापनुत्तये न कदाचिन्न दद्यात् तिर्यक्न्यसेद्ध्यूर्ध्वेन भस्मना श्राद्धे यज्ञे जपे होमे वैश्वदेवे सुरार्चने धृतत्रिपुंड्रः पूतात्मा म
त्युं जयति मानवः इति कात्यायनः भविष्ये सितेन भस्मना कुर्यात् त्रिपुंड्रं च त्रिसंध्यकं सर्वपापविनिर्मुक्तः शिवेन सह मो
दते अकरणे प्रत्यवायः स्नानं शौचं जपो होमस्तीर्थदेवादिपूजनं तस्य व्यर्थमिदं सर्वं यस्त्रिपुंड्रं न धारयेत् रत्नावल्यां म
ध्यमानामिकांगुष्ठैरनुलोमविलोमतः अतिस्वल्पमनायुष्यमतिदीर्घं तपःक्षयं नेत्रयुग्मप्रमाणेन त्रिपुंड्रं धारयेद्द्वि
जः पारिजाते धार्यं भस्म त्रिपुंड्रं तु गृहिणा जलसंयुतं सार्वकालं भवेत्स्त्रीणां यतीनां जलवर्जितं मध्यांगुलित्रयेण
वस्य दक्षिणकरस्य च त्रिपुंड्रं धारयेद्विद्वान् सर्वकल्मषनाशनं त्रिपुंड्रं धारयेद्विप्रो मनसापि न लंघयेत् श्रुत्या विधीयते

१३ न्यानि धेहि देवापि मार्जयेन्मृन्मयेनपि वा औदुंबरे च सौवर्णे राजते दारुसंभवे कृत्वा तु वामहस्ते वा संध्योपासनं समाचरेत्
यस्मात् भस्माभावात् पतितो भवेत् त्रिपुंड्रेण विना येन विप्रेण यदनुष्ठितं न तद्ध्यानं न तज्ज्ञानं तद्दानं जपो न सः पारिजाते ये भस्मधारिणं
द्वा वा चानिंदंति मानवाः तेषां शुद्धिर्न विद्येत सत्यं न वा निपद्यते मध्येऽपि गुरुपादोष्ठ गत्वा स्वपिति स्तेयं ब्रह्महत्यां च कृत्वा
भस्मच्छन्नो भस्मशायी भस्मस्नायी रुद्राध्यायी मुच्यते पातकेभ्यः इति नारदः नाभिन्नां ज्ञातिपद्येत गायत्रीं ब्रह्मणा सह साव
मस्मीत्युपासीत विधिना येन केनचित् प्रतिग्रहात् दोषात्तु पातकादुपपातकात् गायत्री प्रोच्यते यस्मात् कृत्यं तत्रायते
यतः सवितृद्योतनात्सैव सावित्री परिकीर्तिता जगतः प्रसवित्रीवाग्रूपत्वात् सरस्वती उत्तमा तारकोपेता मध्यमा लु
प्ततारका अधमा सूर्यसहिता प्रातःसंध्या त्रिधा मता उत्तमा सूर्यसहिता मध्यमा लुप्ततारका अधमा तारकोपेता
सायंसंध्या त्रिधा मता अनृतं मद्यगंधं च दिवामैथुनमेव च पुनाति वृषलस्यान्नं बहिःसंध्या ह्युपासिता शातातपः
नासिकामंगुलीभिश्च धृत्वा जपेत् दक्षिणेन समाकृष्य वामेन तु विसर्जयेत् प्रणवव्याहृतीः सप्त गायत्रीं शिर
सा सह त्रिः पठेदायतप्राणः प्राणायामः स उच्यते शनैर्नासापुटे वायुं उत्सृजेन्न तु वेगतः न कंपयेच्छरीरं तु संयोगः परमो म
तः इति शौनकः नवप्रणवयुक्तेन आपोहिष्ठा तृचेन च संवत्सरकृतं पापं मार्जनांते विनश्यति अग्निविधाने सूर्यश्चेत्यनु
वाकेन प्रातःकाले पिबेदपः अग्निश्चेत्यनुवाकेन सायंकाले पिबेदपः आपः पुनंतु मध्याह्ने मंत्राचमनमारभेत् इति भगवान्
प्रणवेन व्याहृतिभिर्गायत्र्या प्रणवाद्यया आपोहिष्ठेति सूक्तेन मार्जनं हि चतुर्थकं भगवान् ऋगंते मार्जनं कुर्यात् पादांते वा
समाहितः अर्धर्चांतेऽथवा कुर्याच्छिष्टानां मतमीदृशं प्रजापतिः उद्धृत्य तु तथा हस्तं नासिकाग्रे समर्पयेत् अत्रैवेति
पठित्वार्थ संकल्पं तु क्षितौ क्षिपेत् ब्राह्मणः पाणिभ्यां जलमादाय गायत्र्या चाभिमंत्रितं रवेराभिमुखस्तिष्ठन्नूर्ध्वं सं
ध्ययोः क्षिपेत् शौनकः आकृष्टि निधाय षोडशाक्षरमंत्रेण पुनराद्यमतत्परः षोडशाक्षरकं ब्रह्म गायत्र्यास्तु शिरः स्मृ
तं ओंमापोज्योतिरित्येष मंत्रो वेदे शिरीयकः जलेष्वर्घ्यं प्रदातव्यं जलाभावे शुचिस्थले संप्रोक्ष्य वारिणा सम्यक्

आभारमंडपस्थं ध्योत्ति विशेषं अंजलिपुटं प्रतिपत्तिस्तानेनासापुटेन संध्यां परिसमाप्य तत्रमंदेहासुरनिबर्हणायजलांज
× लिना सप्तासिपामीतिभावयन् गायत्र्या शिरसायुतस्तत्तेजो वाममार्गेण स्वस्मिन्स्थापयेत् इति अर्घ्यविशेषः ×
ततोऽर्घ्यं तु प्रदापयेत् सायंप्रातश्च मध्याह्ने सावित्रीं वाग्यतो जपेत् सहस्रपरमां देवीं शतमध्यां दशावरां गायत्रीं संस्मरन्दृना
न्हृदि वा सूर्यमंडले मनःसंतोषणं शौचं मौनं मंत्रार्थचिंतनं अव्यग्रत्वमनिर्वेदो जपसंपत्तिहेतवः इति भगवान् कौशेयं कंबलं चै
व अजिनं पट्टमेव च दारुजं तालपत्रं च आसनं परिकल्पयेत् वंशासने तु दारिद्र्यं पाषाणे व्याधिसंभवः धरण्यां दुःखसंभूति दौर्भाग्यं
छिन्नदारुजे तृणे धनयशोहानिः पल्लवे चित्तविभ्रमः इतिव्यासः वस्त्रेणाच्छाद्य तु करं दक्षिणं यः सदा जपेत् तस्य तत्सफलं
जप्यं तद्विना विफलं भवेत् इति बृहन्मनुः उत्तमं मानसं जप्यं उपांशुं मध्यमं विदुः अधमं वाचिकं प्राहुः सर्वमंत्रेषु वै द्विज इति वि
श्वामित्रः गच्छंस्तिष्ठंस्तो वापि स्वेच्छया कर्म कुर्वते अशुचिर्वा विना संख्या तत्सर्वं निष्फलं भवेत् इति गौतमः शतं स्यात् शंखम
णिभिः प्रवालैश्च सहस्रकं स्फाटिके दशसाहस्रं मौक्तिके लक्षमुच्यते पद्माक्षैर्दशलक्षं तु सौवर्णैः कोटिरुच्यते कुशग्रंथ्या च
रुद्राक्षैरनंतफलमुच्यते इति गौतमः रात्रौ प्रहरपर्यंतं दिवा कुसमानि कारयेत् अवगाह्य ब्रह्मयज्ञं सौरं चैव विवर्जयेत् सं
ध्यामुपासते ये तु सततं शंसितव्रताः विधूतपापास्ते यांति ब्रह्मलोकं सनातनं इति यमः संध्याहीनोऽशुचिर्नित्यमनर्हः
सर्वकर्मसु यदन्यत्कुरुते कर्म न तस्य फलभाग्भवेत् दक्षः सूतके कर्मणां त्यागः संध्यादीनां विधीयते सूतके मृतके कु
र्यात्प्राणायाममंत्रकं तथा मार्जनमंत्रांस्तु मनसोच्चार्य मार्जयेत् गायत्रीं सम्यगुच्चार्य सूर्यायार्घ्यं निवेदयेत् मार्ज
नं तु न वा कार्यं उपस्थानं न चैव हि गायत्रीं दशधा जप्त्वा उपस्थानं न चैव हि इति भरद्वाजः जलाभावे महामार्गे बंधनेस्वरु
चाथवापि उभयोः संध्ययोः काले रजसार्घ्यं समुत्सृजेत् दशकृत्वः पिबेदापो गायत्र्या श्राद्धभुग्द्विजः ततः संध्यामुपासीत
शुध्यते तदनंतरं नैतत् श्रेष्ठेभ्यो ज्ञानप्राप्तिस्तस्य गुरुणा वक्ष्यमाणत्वात् किंतु संध्याधिकारायैतिपारिजाते विष्णोर्नु
अपेक्षितं विष्णुरेव भविष्यति सन्निधाने तद्बुद्धिस्संवापि सद्योजातादिपंचकं पंचाक्षरं महामंत्रं जपेदनुदिनं सुधीः

आयुरारोग्यमैश्वर्यं संततिः पूर्णजीवनं संपत्समृद्धिसौख्यं च लभते शिवशासनात् इति वासिष्ठः संध्याकर्मावसाने तु स्वयं हो
मो विधीयते ऋत्विक्पुत्रो गुरुर्भ्राता भागिनेयोऽथ विट्पतिः एतैरपि हुतं यत्स्यात् तद्धुतं स्वयमेव हि इति दक्षः विट्पतिर्जामाता
संध्यावंदनं संक्षिप्तमाह मङ्गलकारः आचम्य मार्जनं कृत्वा ततः प्राणान्समायमेत् प्राणायामैस्त्रिभिः पूतो गायत्र्या जपमा
चरेत् तिष्ठन्नाचोदयात् जपे द्व्याहृतिपूर्वकं आसीनः प्रसकृत्सायं तु वह्निकार्यं ततः पुनः समापयेत् निरुंध्यात्
श्रौतस्मार्तानि कर्माणि कुर्याद्वेदपरायणः अग्निहोत्रफला वेदाः सषडंगपदक्रमाः इति मूलं अग्निहोत्रासरे धर्मो नश्य
तेन भविष्यति अग्निहोत्रं प्रकुर्वीत ज्ञानेन श्रद्धयान्वितः इष्टीश्च पशुसोमांश्च पाकयज्ञान्कुशार्चनं धर्माचाराश्च दाना
नि कुर्याद्धर्मपरायणः श्रौतं कर्म न चेच्छक्तः कुर्यात्स्मार्तं समाचरेत् तत्राप्यशक्तः करणे सदाचारं लभेद्बुधः सदाचारः स्नान
संध्यादिः व्यासः स्वातिप्राप्य कृतं कर्म यत्किंचित् ज्ञानवर्जितं क्रीडाकर्मेव बालानां तत्सर्वं निष्फलं भवेत् इसांगिराः
बकुरुष्वेंधनेवाप्यो सुसमिद्धे हुताशने विधूमे लेलिहाने च तद्वै ध्वंकर्म सिध्यकृये योनाचिंषि त्वहोत्सर्गतो व्यंगारे चैव मानवः
मंदाग्निरामयावी च दरिद्रश्चापि जायते इति विष्णुः अग्निचित्कपिला सत्री राजा भिक्षुर्महोदधिः दृष्टमात्राः पुनंत्येते
तस्मात्पश्येच्च नित्यशः इति नारदः इति प्रथमभागकृत्यं द्वितीये च तथा भागे वेदाभ्यासो विधीयते वेदस्वीकरणं पूर्वं
विचारोऽभ्यसनं जपः तद्दानं चैव शिष्येभ्यो वेदाभ्यासो हि पंचधा समित्पुष्पकुशादीनां सकालः समुपाहृतः इति वृत्ती
यभागकृत्यं तृतीये च तथा भागे पोष्यवर्गार्थसाधनं न्यायोपार्जितवित्तेन कर्तव्यं तु सदा द्विजैः मूलं कुसीलकुंभी
धान्यो वा त्र्याहिकोऽश्वस्तनोऽपि वा जीवेद्वापि शिलोंछेन श्रेयानेषां परः परः कुसीलो द्वादशाहपर्याप्तधान्यः षडहपर्याप्त
धान्यः कुंभीधान्यः वल्लर्यादिग्रहणं शिलं कणोपादानमुंछमिति पारिजाते षण्णां तु कर्मणामस्य त्रीणि कर्माणि जी

विका याजनाध्यापनाद्येव विशुद्धाच्च प्रतिग्रहात् राजप्रतिग्रहो घोरो मध्वास्वादो विषोपमः पुत्रमांसं वरं भोक्तुं न तु राजप्र
तिग्रहः इति मलं शुचीनामशुचीनां च सन्निपातो यथांभसां समुद्रे समतां याति तद्वद्राज्ञो धनागमः यथाग्नौ संस्थितौ
सर्वं शुद्धिमायाति कांचनं एवं प्रतिग्रहाः सर्वे शुचितां यांति राजनि इति मलं नकुर्यात्कृषिवाणिज्यं सवाहनितथैव
चे ब्राह्मण्याद्धीयते तेन तस्मात्तानि विवर्जयेत् मलं वृद्धौ च मातापितरौ साध्वी भार्या शिशुः सुतः अप्यकार्यशतं
कृत्वा भर्तव्या मनुरब्रवीत् अकार्यशतं अयाज्ययाजनादि मलं कुशाः शाकं पयो मत्स्याः पुष्पं गंधं दधि क्षितिः मांसं
शय्यासनं धानाः प्रत्याख्येयं न वारि च विद्वानेश्वरः इति तृतीयभागकृत्यं चतुर्थे तु तथा भागे स्नानार्थं मृदमाहरेत् पंचम
हायज्ञाः यदग्नौ जुहोति स देवयज्ञो यत्स्वाध्यायमधीते स ब्रह्मयज्ञो यद्बलिं करोति स भूतयज्ञो यत्पितृभ्यो ददाति स पि
तृयज्ञो यन्मनुष्येभ्यो ददाति स मनुष्ययज्ञः तानेतान्यज्ञानहरहः कुर्वीतेति अग्निमीळेत्यतस्तु जपं पापघ्नं श्रीकरं परं
पवित्रायणफलं तस्य वेदनात्स्यात्सहस्रशः सव्येन कुशाग्रैस्तर्पयेद्देवान् मनुष्यान् कुशमध्यतः द्विगुणीकृत्य
भाग्रैः पितॄन् संतर्पयेद्द्विजः इति योगयाज्ञवल्क्यो जीवत्पितृकविषये विशेषः कव्यवाडनलः सोमो यमश्चैवार्यमा
तथा अग्निष्वात्ताः सोमपाश्च तथा बर्हिषदोपि च अकरणे प्रत्यवायः देवताश्च मुनींश्चैव पितॄन्यो नहि तर्पयेत्
देवतानामृणी भूत्वा नरकं प्रतिपद्यते इति योगयाज्ञवल्क्यः दीपोत्सवे चतुर्दश्यां कार्यं तु यमतर्पणं कृष्णांगारच
तुर्दश्यामपि कार्यं सदैव वेति स्मृतिचंद्रिकायां यमाय धर्मराजाय मृत्यवे चांतकाय च वैवस्वताय कालाय सर्वभू
तक्षयाय च औदुंबराय दध्नाय नीलाय परमेष्ठिने वृकोदराय चित्राय चित्रगुप्ताय ते नमः चतुर्दशैते मंत्राः स्यु

श्चतुर्थ्यंता नमोन्विताः एकैकेन तिलैर्मिश्रांस्त्रींस्त्रीन्दद्याज्जलांजलीन् यावज्जीवकृतं पापं तत्क्षणादेव नश्यति स्मृतिरत्नावल्यां वि
किरेत् पिंडदाने च तर्पणे स्नानकर्मणि आचांतः सन्नप्रकुर्वीत दर्भसंसर्जनं बुधः येषां पिता न च भ्राता न पुत्रो नान्यगोत्रिणः ते सर्वे तृ
प्तिमायांतु मयोत्सृष्टैः कुशैस्तथा भारते कलौ कलिमलध्वंसं सर्वपापहरं हरिं येऽर्चयंति नरा नित्यं तेपि वंद्या यथा हरिः
ब्रह्मा कृतयुगे देवस्त्रेतायां भगवान् रविः द्वापरे भगवान् विष्णुः कलौ देवो महेश्वरः प्रतिमापटयंत्राणां नित्यं स्नानं न कार
येत् कारयेत्सर्वदिवसे यथा मलनिवारणं न विष्ण्वाराधनात्पुण्यं विद्यते कर्म वैदिकं तस्मादनादिमध्यांतं नित्यमा
राधयेद्धरिं अथवा देवमीशानं भगवंतं सनातनं आराधयेन्महादेवं भावपूतं महेश्वरं मंत्रेण रुद्रगायत्र्या प्रणवेनाथ
वा पुनः ईशानेनाथवा रुद्रं त्र्यंबकेन समाहितः तथों नमः शिवायेति मंत्रेणानेन वा यजेत् नमस्कुर्यान्महादेवं सततं स
मतीश्वरं आसनानंतरं अग्रतो ब्रह्माणं कल्पयामि दक्षे स्कंदं विनायकं पश्चिमतः स्थूलं उत्तरतः उमां नंदिकेश्वरं पाद्या
र्घ्याचमनीयं दत्वा चंडीशाय नम इति व्याहृतिभिर्निर्माल्यं अपोह्य उत्तरे आपोहिष्ठेन हिरण्यवर्णाः शुचयः पवमानः सु
वर्जनं इत्यनुवाकेन स्नापयेत् भवाय देवायेति अष्टपुष्पाणि दद्यात् न्यूनातिरिक्तता दोषः कलौ वेदोक्तमार्गेण हरिस्म
रणमेवातो संपूर्णफलदायकं इति बृहन्नारदीये इति चतुर्थभागकृत्यं वैश्वदेवः प्रकर्तव्यः पंचसूनापनुत्तये
पंचसूना गृहस्थस्य वर्तंतेऽहरहः सदा यमः कंडनी पेषणी चुल्ली जलकुंभ उपस्करः इति हिंसास्थानानि कंडनी मुसलो
लूखलादिः पेषणी दृषदुपलादिः उपस्करः शूर्पादिः अतिथिभ्यो न दानं तु न यज्ञः स तु पंचमः मनोः हंतकारमथाग्रं
वा भिक्षां वा शक्तितो द्विजः दद्यादतिथये नित्यं बुध्येत परमेश्वरं इति कूर्मे अतिथिं परमेश्वरबुद्ध्या पूजयेत् भिक्षालक्षणं
मनुः ग्रासमात्रं भवेद्भिक्षा अग्रं ग्रासचतुष्टयं अग्रं चतुर्गुणीकृत्य हंतकारो विधीयते पंचयज्ञांस्तु यो मोहान्न करोति
गृही नरः तस्य चायं न च परो लोको भवति धर्मतः इति व्यासः यत्फलं सोमयागेन प्राप्नोति धनवान्द्विजः सम्यक्प

वमहायस्नेर्दैवमिन्नस्तवद्वाप्नुयात् इतिमाधवः उपलिप्ते समे स्थाने शुचौ श्लक्ष्णसमन्विते चतुरस्रं त्रिकोणं वा वर्तुलं चार्धचन्द्रकं कर्त्त
व्यमानुपूर्व्येण ब्राह्मणाद्यैः सुमंडलं पंचार्द्रो भोजनं कुर्यात्प्राङ्मुखो मौनमास्थितः हस्तौ पादौ तथैवास्यमेषु पंचार्द्रता मता व्यासः
अन्नं दृष्ट्वा प्रणम्यादौ प्रांजलिः कथयेन्नरः अस्माकं नित्यमस्त्वेतदिति भक्त्याथ वंदयेत् ब्रह्मपुराणे कुवल्कसंख्यामापस्तंबः अष्टौ ग्रासा मुनेर्भक्ष्याः षोड
शारण्यवासिनः द्वात्रिंशत्तु गृहस्थस्य अमितं ब्रह्मचारिणः वक्त्रप्रमाणपिंडाश्च ग्रसेदेककरः पुनः वक्त्राधिकं तु यः पिंडे आत्मोच्छिष्टं
दुच्यते आश्वमेधिके भोजनं तु न निःशेषं कुर्यात्प्राज्ञः कथंचन अन्यत्र दधिसक्त्वाज्यपललक्षीरमध्वनः पुलस्त्यः सायंप्रातर्द्विजातीनां
नशनं श्रुतिचोदितं नांतरा भोजनं कुर्यादग्निहोत्रसमो विधिः मनोः लवणं व्यंजनं चैव घृतं तैलं तथैव च लेह्यं पेयं च विविधं हस्तदत्तं
न भक्षयेत् इति पैठीनसिः अप्येकपंक्त्यां नाश्नीयाद्ब्राह्मणैः स्वजनैरपि को हि जानाति किं कस्य प्रच्छन्नं पातकं भवेत् एकपंक्त्युपविष्टानां दुष्कृ
तं यद्दुरात्मनो सर्वेषां तत्समं तावत्संक्तिर्यावन्न भिद्यते अग्निना भस्मना चैव स्तंभेन सलिलेन वा द्वारेणैव च मार्गेण पंक्तिभेदो बुधैः स्मृतः इ
ति बृहस्पतिः आयुष्यं प्राङ्मुखो भुंक्ते यशस्यं दक्षिणामुखः श्रियं प्रत्यङ्मुखो भुंक्ते सत्यं भुंक्ते उदङ्मुखः इति मनुः हस्तं प्रक्षाल्य गंडूषं यः
पिबेद्विचक्षणः स देवांश्च पितॄंश्चैव ह्यात्मानं चैव घातयेत् इति व्यासः विष्णुरत्नात्तथैवान्नं परिणामश्च वै तथा स स्नेन तेन वै भुंक्ते जीर्ण
न्नमिदं तथा इत्युच्चार्य स्वहस्तेन परिमृज्य तथोदरं अनायासप्रदायी नि कुर्यात् कर्माण्यनंतरं भूयोप्याचम्य कर्तव्यं ततस्तांबूलभक्ष
णं वसिष्ठः पर्णमूले भवेद्व्याधिः पर्णाग्रे पापसंभवः चूर्णपर्णं हरेदायुः शिरा बुद्धिविनाशिनी तस्मादग्रं च मूलं च शिराश्चैव विशेषतः
चूर्णपर्णं वर्जयित्वा तांबूलं खादयेद्बुधः इति वसिष्ठः इति पंचमभागकृत्यं इतिहासपुराणाद्यैः षष्ठसप्तमकौ नयेत् इति दक्षः अष्टमे
लोकयात्रां तु बहिः संध्यां ततः पुनः प्रदोषपश्चिमौ यामौ वेदाभ्यासेन वर्तयेत् प्रहरद्वयशायी तु ब्रह्मभूयाय कल्पते इति दक्षः स्वगृहे प्राक्शि
राः शेते आयुष्यं दक्षिणाशिराः प्रत्यक्शिराः प्रवासे तु न कदाचिदुदक्शिराः गार्ग्यः रात्रिसूक्तं जपेत्स्मृत्वा सर्वांश्च सुखशायिनः
नमस्कृत्याव्ययं विष्णुं समाधिस्थः स्वपेन्निशि अगस्तिर्माधवश्चैव मुचुकुंदो महामुनिः कपिलो मुनिरास्तीकः सर्वे ते सुखशा

यिनः इति गोभिलः इत्येतदखिलं प्रोक्तमहन्यहनि वै मया ब्राह्मणानां कृत्यजातं अपवर्गफलप्रदं नास्तिक्यादथवालस्याद्ब्राह्म
णान्न करोति यः स याति नरकान्घोरान्काकयोनौ प्रजायते नान्यो विमुक्तये पंथा मुक्त्वाश्रमविधिं स्वकं तस्मात्कर्माणि कुर्वी
त तुष्ट्यर्थं परमेष्ठिनः इति कूर्मपुराणे अथ संन्यासप्रशंसा येच संतानजा दोषा ये च स्युः कर्मसंभवाः संन्यासस्तान्दहेत्सर्वा
न्तुषाग्निरिव कांचनं मनुरपि मत्तोये शुध्यते शोध्यं नदी वेगेन शुध्यति रजसा स्त्री मनो दांतः संन्यासेन द्विजोत्तमः चतु
र्थमाश्रमं गत्वा ब्रह्मविद्यापरायणः एकदंडी त्रिदंडी वा सर्वसंगविवर्जितः एकाकी चिंतयेद्विद्वान् यत्तत्संज्ञानमेव च सर्वसत्त्वगतं
सूक्ष्मं सर्वसत्त्वविवर्जितं इति मूले संन्यासश्चतुर्धा कुटीचकबहूदकहंसपरमहंसभेदात् वाग्दंडोथ मनोदंडः कर्मदंडस्तथैव
च यस्यैते नियता बुद्धौ स त्रिदंडीति गीयते मनुः ज्ञानदंडो धृतो येन एकदंडी स उच्यते एकदंडी त्रिदंडी वा शिखी मुंडित एव वा का
षायमात्रसारोपि यतिः पूज्यो युधिष्ठिर इति भारते संचिंतयन्नेकदेहस्थस्य पापमनामरणांतिकं निर्दहिष्यति तत्सर्वं एकरा
त्रोषितो यतिः इति दक्षः अथ सर्वसाधारणप्रायश्चित्तं त्रिमासाद्यब्दमासांतेषु सपिंडने चाप्याब्दिके चोपवासः
पादकृच्छ्रं वा अशक्ते षट्प्राणायामाः द्वौ वा त्रिः प्राणायामाः तत्रैव निस्पृहभोक्तुरूपरशीलिनो वा तदर्धं एकभक्तेन न
क्तेन तथैवायाचितेन च उपवासेन चैकेन पादकृच्छ्रः प्रकीर्तितः यथा कथंचित्त्रिगुणः प्राजापत्योयमुच्यते एकभक्त
द्विषु ग्रासस्संख्या प्रातस्तु द्वादश ग्रासाः सायं पंचदशैव तु अयाचितेष्वष्टौ प्रोक्ताः परमं मारुतभोजनं इति
तावन्मात्रः पिबेदपो यावद्धामेन न स्पृशेत् वामे च बाहुदरादि सारुद्राः एकादशेति च

असाधोरपिकर्त्तव्यसीदतावैश्वातिथ्यः भरद्वाजोहितक्ष्णःक्षुत्पीडितोजग्राहबृबोः तदर्थमियमृक् अधिबृबुःपणीनां० भरद्वाजोरण्ये
क्षुत्पिपासापीडितःपर्यटंस्तक्षकर्मकुर्वाणं बृबुंदृष्ट्वातमुवाच अतिथिंमांविद्धि सोप्युपस्थाप्यप्राञ्जलिर्भरद्वाजमुवाच अहंतक्षा तक्ष्णःप
तितचांडालादिभ्यएवब्राह्मणानप्रतिग्रहंकर्तीतिश्रूयते यदितवधर्मोनपीड्यते तर्हिवद त्वयादत्तंनप्रसारख्यास्यामि तेनचतथेत्युक्तेतंब
बुःपाणादिभिरुपचर्योवाच अहंवाहुबहुपशुरेष्य(?)ःमदीयोगावोनपितृदेवाभिषिक्तपयःयुक्तं(?) भवताचोक्तं त्वयादत्तंनप्रसारख्या
स्यामीति तेनात्मानमुद्धृत्यस्वर्गभाजंकर्त्तुमनागाःप्रतिपादयामि एवमुक्त्वागवांसहस्रंददौ तद्बृहद्धः प्रतिग्रहयुभ्रात्रेरीय
पेवाचचक्षे अथर्शंयुःजीतमन्त्राः अधिबृबुरित्यनेनतत्रैवगायत्रेणात्रिष्टुबंतेनबृबुंतुष्टावति तत्रैवबृबुस्तक्षादेवतेत्यनुक्रमणी
तथामनुः भरद्वाजःक्षुधार्त्तस्तुसपुत्रोनिर्जनेवने बह्वीर्गाःप्रतिजग्राह बृबोस्तक्ष्णोमहायशाः यत्पुत्रियश्चकुणपयश्चकीटपि
पीलिकः सर्वंतदग्निर्दहतिदेवत्वान्नलिप्यते एतेनैवोपमानेनयथावैश्वानरस्तथा ब्राह्मणःसर्ववर्णेभ्यआददानोनदुष्यति
अथेत्यस्तु पणनात्पणयोवणिजः एतसंताभस्करावाते स्वांतस्तक्षाः बृबुः वर्षिष्ठे मूर्धन्मूर्धनि मूर्धेवदुच्छ्रितेस्थानेअध्य
स्थात् अधितिष्ठतिभवत्र गांग्यःगंगायाःकूलेउन्नतेभवः कक्षोनकक्ष इव उरुविस्तीर्णःसन्नजातिहीनोपिदातृत्वात्सर्वश्रेष्ठोभव
तीत्यर्थः यस्यवायोरिवेति वायोरिवद्रवतःक्षिप्रगामिनः यस्यरवः भद्राकल्याणीसहस्रिणीसहस्रसंख्याकारातिर्दानंसद्यःस्तु
तिसद्यएवदातायदानकामाययाचमानायमह्यंमंहते अपेक्षितेधनंददातितंबृबुमिति उत्तरस्यामृचिसंबंधः तत्स्तुवद्गृति
ततबृबुंनोस्मदीयाः विश्वेसर्वेअर्वःस्तुतीनामीरयितारःकारवस्तोतारःस्तु सुष्टु आगृणंति अभिष्टुवंति कीदृशं सहस्र
दातमं अतिशयेनसहस्रस्यसंख्यस्यधनस्यदातारस्त्वांप्राहुः यद्वाप्रेरयितारं(?) सहस्रसातमं अतिशयेनसहस्रसंख्यस्यधनस्यसो
त्रस्यवासंभक्तारमिति एवंसीदताभरद्वाजेनतक्ष्णःप्रतिगृहीतं॥ सज्जनःस्वेष्टदेवानांस्मरणादापदस्तरेत् यथामार्गच्युतो
मार्गेदेवान्स्मृत्वापदोतरत् अत्राथेत्यक् ऋग्व्युत्तिः(?)क्षेत्र० सक् अरण्येनिर्जनेगोष्ठे देवान्भूमिंवृहस्पतिं इंद्रंचा
तोस्वरक्षार्थं स्तवामार्गच्युतोनयः॥२

कृष्णेकृष्णात्मिनीवीयो भक्तोमानाद्यधिके धनेः षट्कर्मनिरतः पूज्यो
हव्यकव्यादिकेषु च १ इतिवृहत्पाराशरस्मृतौ २...